## रोगाख्यायां ण्वुल् बहुलम् । (१०८/३२८७)

[1]रोगाख्यायां गम्यमानायां धातोः ण्वुल् प्रत्ययो बहुलं भवति । क्तिन्नादीनामपवादः । आख्याग्रहणं रोगस्य चेत् [2]प्रत्ययान्तेन सञ्ज्ञा भवति । बहुलग्रहणं व्यभिचारार्थम् । प्रच्छर्दिका । प्रवाहिका । [3]विर्चचिका । न [4]च भवति । शिरोर्तिः ।

[३१८] धात्वर्थनिर्देशे ण्वुल् वक्तव्यः । (म.भा. २.१५४)

[5]आशिका । [6]शायिका वर्तते ।

[३१९] इक्श्तिपौ धातुनिर्देशे[7] । (म. भा. २.१५४)

[8]भिदिः । छिदिः । पचतिः । पठतिः ।

[३२०] वर्णात् कारः । (म. भा. २.१५४)

निर्देश इति प्रकृतम् । अकारः । इकारः[9] ।

[३२१] रादिफः । (म. भा. २. १५४)

रेफः ।

[३२२] मत्वर्थाच्छः । (म.भा. २.१५५)

अकारलोपः[10] । मत्वर्थीयः ।

[३२३] इणजादिभ्यः । (म. भा. २.१५५)

आजिः । [11]आतिः । आदिः ।

[३२४] इक् कृष्यादिभ्यः । (म. भा. २.१५५)

कृषिः । किरिः[12] ॥

## सञ्ज्ञायाम् । (१०९/३२८८)

सञ्ज्ञायां विषये धातोः ण्वुल् प्रत्ययो भवति । [13]उद्दालकपुष्पभञ्जिका । [14]वरणपुष्पप्रचायिका । [15]अभ्यूषखादिका । आचोषखादिका । [16]शालभञ्जिका । तालभञ्जिका ॥

---

1. स्त्रियामिति वर्तते इत्यधिकम् ब. 2. प्रत्ययान्तसञ्ज्ञा अ. ब. क. फ. ह. 3. विर्चचिका नास्ति फ, विर्चविका ड. 4. च नास्ति ह. 5. आसिका अ. ब. क. ड. 6. शायिका नास्ति अ. 7. वक्तव्यौ इत्यधिकम् क. 8. भिदिः नास्ति फ, विधिः क. 9. उकारः इत्यधिकम् ह. फ, ककारः ड. 10. भवति इत्यधिकम् फ, अकारलोपः नास्ति ड. 11. आतिः नास्ति ब, आदिः नास्ति ब. ड, आर्दिः क. 12. ऋषिः इत्यधिकम् ह, गिरिः इत्यधिकम् अ. ब. क. ड. 13. सालपुष्पभञ्जिका फ. 14. वक्षणपुष्प° अ, वारणपुष्प°क, वीणपुष्पभञ्जिका ब, बाणपुष्पप्रवाहिका ड. 15. अभ्योषभञ्जिका ह. 16. मालरञ्जिका अ, नालभञ्जिका ह, मालभञ्जिका अ.